दैनिकम् ई-संस्कृतवार्तापत्रम्

# हिमसंस्कृतवार्ता

पञ्चाङ्गम्
वि.सं. २०८३,
कलियुगाब्धः ५१२७ ग्रीष्म-ऋतुः
सूर्यः उत्तरायणम् ज्येष्ठशुक्लद्वितीया
आषाढः 02 प्रविष्टांशः मङ्गलमयः भवेत्

■ पृष्ठ-5 ■ वर्ष-5 ■ अङ्क-234 | 1 | जून 16, 2026 | Website- www.himsanskritam.com | Email-himsanskrit@gmail.com



2 वयं शपथं गृह्णीमः... हिमालचप्रदेशस्य २९०८ पञ्चायतेषु प्रधानैः उपप्रधानेश्च गृहीतं शपथम्, मङ्गलवासरादारभ्य कार्यप्रारम्भः

3 नागपुरे सांस्कृतिक-कृत्रिम-बुद्धिमत्ता-ग्रीष्मकालीन-कार्यशालायाः शङ्खनादः, संस्कृत-आधुनिक-तन्त्रज्ञानयोः समन्वयेन विकसितं भविष्यति भारत-केन्द्रितम् 'एआई'

5 आर.एस.एस. (RSS) सङ्घटनाय पञ्जीकरणस्य आवश्यकता नास्ति, कर्नाटकस्य गृहमन्त्रिणे प्रियाङ्क-खडगे महोदयाय मोहनभागवतस्य उत्तरम्


## भारतेन अमेरिका-इरानयोः सन्धेः स्वागतं कृतम् अस्ति



हिमसंस्कृतवार्ता। भारतेन पश्चिम एशियायां प्रचलति संघर्षस्य समाप्तये अमेरिका-इरानयोः सन्धेः स्वागतं कृतम् । एतेन संघर्षेण विश्वे गम्भीरः आर्थिकसंकटः जातः, अनेकेषु देशेषु प्राणहानिः च अभवत्। प्रधानमन्त्री नरेन्द्रमोदीः सामाजिकमाध्यमेषु एकस्मिन् संदेशे उक्तवान् यत् भारतस्य आशा अस्ति यत् सन्धेः कार्यान्वयनेन क्षेत्रे शान्तिः स्थिरता च पुनः स्थापिता भविष्यति। अनया व्यापारस्य स्वतन्त्रता सुनिश्चिता भविष्यति ।

## डी.आर.डी.ओ. (DRDO) इत्यनेन स्वदेशनिर्मितस्य दीर्घ-पल्ल्याः भूमि-आधारित-आक्रमण-क्षमता-युक्तस्य क्रूज-क्षेपणास्त्रस्य सफलपरीक्षणं कृतम्



रक्षा-अनुसन्धान-विकास-सङ्घटनेन (डी.आर.डी.ओ.) गतदिने ओडिशा-राज्यस्य डॉ. ए.पी.जे. अब्दुल-कलाम-द्वीपात् दीर्घ-पल्ल्याः भूमि-आधारित-आक्रमण-क्षमता-युक्तस्य क्रूज-क्षेपणास्त्रस्य सफलपरीक्षणं कृतम्। इदं क्षेपणास्त्रं पूर्णतया स्वदेशनिर्मितम् अस्ति, यस्य सर्वाणि उप-तन्त्राणि डी.आर.डी.ओ. इत्यस्य विभिन्न-प्रयोगशालाभिः भारतीय-उद्योग-सहयोगिभिः च विकसितानि सन्ति। रक्षा-मन्त्रालयेन सामाजिक-माध्यमे एकस्मिन् सन्देशे सूचितं यत् क्षेपणास्त्रेण स्वकीयानि सर्वाणि लक्ष्याणि साधितानि। मन्त्रालयेन उक्तं यत् इदं सफलपरीक्षणम् 'आत्मनिर्भर-भारतस्य' दृढ-राष्ट्रीय-रक्षा-प्रणाल्याः च दिशि एकम् अन्यत् महत्त्वपूर्णं पदम् अस्ति।रक्षामन्त्रिणा राजनाथ-सिंहेन क्रूज-क्षेपणास्त्रस्य सफल-उड्डयन-परीक्षणाय डी.आर.डी.ओ.-दलाय (DRDO Team) उद्योग-सहयोगिभ्यः च अभिनन्दनं ज्ञापितम्।

# प्रधानमन्त्री अवोचत् भारत-स्लोवाकिया देशौ व्यापकसहभागितया सम्बन्धान् समुन्नेतुं निर्णयं कृतवन्तौ



हिमसंस्कृतवार्ता। प्रधानमन्त्री नरेन्द्रमोदी स्लोवाकिया देशस्य राजधान्यां ब्राटिस्लावा नगर्यां तत्रत्येन प्रधानमन्त्रिणा रॉबर्ट-फिको इत्यनेन सह संवादम् अकरोत्। उपवेशनस्य अनन्तरं संयुक्त-वार्ताहर-सम्मेलने प्रधानमन्त्री नरेन्द्रमोदी अवोचत् भारत-स्लोवाकिया देशौ व्यापकसहभागितया सम्बन्धान् समुन्नेतुं निर्णयं कृतवन्तौ । श्रीमोदी अवोचत् यत् देशद्वयोः रक्षा सहयोगं परस्परविश्वासस्य प्रमाणं वर्तते । देशद्वयेन रक्षाक्षेत्रे सहयोगं समेधितुं अपि सहमतिपत्रं हस्ताक्षरितम्। प्रधानमन्त्री नरेन्द्रमोदी प्रावोचत् यत् ए.आई. इत्यस्य भविष्यं न केवलं नवोन्मेषे अपितु मानवगरिमा-विश्वासाधिरितमपि भवेत्। श्रीमोदी अवोचत्-यत् प्रौद्योगिकी क्षेत्रे विहित सन्धिः अपि देशद्वयोः मिथः सहयोगं दृढयिष्यति । अत्रावसरे स्लोवाकिया देशस्य प्रधानमन्त्री रॉबर्ट-फिको भारतस्य समेधमानार्थव्यवस्थां प्रौद्योगिक विकासं च प्रतिपादितवान्। तेन संयुक्त राष्ट्र सुरक्षा परिषदि भारतस्य स्थायि प्रतिनिधित्वम् अपि समर्थितम्। अवधेयम् यत् गतशताब्दस्य त्रिनवति-तमाब्दे स्लोवाकिया देशस्य स्वतन्त्रतायाः अनन्तरं कस्यापि भारतीय-प्रधानमन्त्रिणः इयं प्रथमा स्लोवाकिया यात्रा वर्तते।

## उत्तरप्रदेशस्य जेवरक्षेत्रे नौएडा अन्ताराष्ट्रिय विमानस्थानकं वाणिज्यिकरूपेण आरब्धम्, गतदिनारभ्य तत्र विमानानां सञ्चालनम् अभवत्





उत्तरप्रदेशजेवरक्षेत्रे नोएडा अन्ताराष्ट्रिय विमानस्थानकं वाणिज्यिकरूपेण आरब्धम्। गतदिनारभ्य तत्र विमानानां सञ्चालनम् अभवत्। एतत् हि देशस्य नागर-विमाननक्षेत्रे महत्त्वपूर्णं सोपानं निर्दिशति। उद्घाटनसमारोहं सम्बोधयन् केन्द्रीय-नागर-विमानन-मन्त्री के. राममोहन-नायडुः अवदत् यत्, विमानस्थानकस्य प्रथम-चरणे प्रतिवर्षं एक-दशमलव-द्वि कोटि-यात्रिणां यात्रानुमानं वर्तते, अनन्तरं प्रतिवर्षं सप्त कोटयधिकयात्रिणां यात्रानुमानं भविष्यति। सः अवदत् यत् एतत् विमानस्थानकं राष्ट्रिय सेवायाः आन्ताराष्ट्रिय विमानसेवायाः च परिचालनस्य केन्द्ररूपेण कार्यं करिष्यति। विमानस्थानकस्य कृते स्वभूमिं दत्तवता सप्तत्यधिक कशतं कृषकाणां समूहः, जेवर-क्षेत्रस्य विधायकस्य धीरेन्द्रसिंहस्य नेतृत्वे अन्यैः च साकं जेवर-विमानस्थानकात् लखनऊ-नगरं प्रति प्रथम-वाणिज्यिक-विमान यात्रां कृतवन्तः।

## आयुष-मन्त्रालयेननव-दिल्ल्यां द्वादशः अन्ताराष्ट्रिय-योग-दिवसस्य भव्यायोजनाय औपचारिक कार्यक्रमाणां शुभारम्भो विहितः



आयुष-मन्त्रालयेन गतदिने नव-दिल्ल्यां द्वादशः अन्ताराष्ट्रिय-योग-दिवसस्य भव्यायोजनाय औपचारिक कार्यक्रमाणां शुभारम्भो विहितः । आयुषमन्त्री प्रतापराव -जाधवः राजधान्यां नवदिल्ल्यां अवोचत् यत् मुख्य कार्यक्रमः प्रधानमन्त्रिणः नरेन्द्र-मोदिनः नेतृत्वे कोलकातायां भविष्यति। अमुना उक्तं यत् अत्रावसरे पञ्चर्चत्वारिंशत् निमेषात्मकं योग-सत्रम् आयोजयिष्यते। मुख्य कार्यक्रमेण सह हुगली नद्यां पञ्चशतं नौकासु योगसत्रायोजनस्य योजना वर्तते । आयुष-मन्त्री अवदत् यत् अन्ताराष्ट्रिय-योगदिवसस्य मुख्य समारोहात् पूर्वं गतदिते विशेष-योग-कार्यक्रमस्य साक्षात् प्रसारेण योग-सत्रे चतुर्लक्षाधिकजनैः प्रतिभागं विधाय गिनीज वर्ल्ड रिकॉर्ड इति विश्वकीर्तिमानं संरचितम्। अवधेयं यत् अस्मिन् वर्षे अन्ताराष्ट्रिय योगदिवसस्य विषयः "स्वस्थ-जीवनाय योगः " वर्तते।

# सुभाषितम्

**न कश्चित्कस्यचिन्मित्रं,**
**न कश्चित्कस्यचिद्रिपुः।**
**व्यवहारेण मित्राणि,**
**जायन्ते रिपवस्तथा।।**
**(हितोपदेश, मित्रलाभ- ७१)**

अर्थात्- न तो कोई किसी का मित्र है, और न कोई किसी का शत्रु है। व्यवहार से ही मित्र तथा शत्रु बन जाते हैं।






सूचना- हिमसंस्कृतवार्ताः दैनिकपत्रे व्याकरणात्मक-अशुध्दीनां कृते, राजनैतिक-सांस्कृतिकविचाराणाञ्च कृते सम्बद्धाः पत्रकाराः लेखकाश्च उत्तरदायिनः भविष्यन्ति


कार्यालयः
हिमसंस्कृतम्, प्रकाशनम्
असवां कोटला तहसीलपरिसरस्य सम्मुखे
कस्बा कोटला जिला कांगड़ा हि.प्र.
पत्रव्यवाहरसङ्केतः-१७७१११
सङ्केतः- प्रबन्धनिदेशिका- शिवानी शर्मा हिमसंस्कृतम्


## वित्तमन्त्री निर्मला सीतारामनः अवोचत् यत् देशे खाद्यान्नस्य पर्याप्त-भण्डारः वर्तते। अथ च अल नीनो कारणेन अपि खाद्यान्नस्य नैयून्यं न भविष्यति

हिमसंस्कृतवार्ता। वित्तमन्त्री निर्मला सीतारामनः अवोचत् यत् देशे खाद्यान्नस्य पर्याप्त-भण्डारः वर्तते। अथ च अल नीनो इति ऊष्णतापस्य दुष्प्रभावेन अपि खाद्यान्नस्य नैयून्यं न भविष्यति। गतदिने राजधान्यां नवदिल्ल्यां आयोजिते माइण्डमाइन इति सम्मेलने वित्तमन्त्री अवोचत् यत् खरीफ इति ग्रीष्मर्तौ धान्येभ्यः पर्याप्त-मात्रायां उर्वरकोपलब्धता वर्तते। तयोक्तं यत् ऐषमः प्रावृट् नैयून्यं स्यादिति सम्भाष्यते तथापि अस्माकं पार्श्वे पर्याप्त-भण्डारः विद्यते।

# विद्यालय-कार्यान्तरं जनगणना-आदेशानां चम्बायां न परिवर्तनस्य प्रकरणं प्राप्तम् उच्चन्यायालयम्




हिमसंस्कृतवार्ताः- शिमला। विद्यालय-कार्यान्तरं जनगणना-कार्यकरणस्य आदेशान् चम्बाजनपदे न परिवर्तनस्य प्रकरणम् उच्चन्यायालयं प्राप्तम् अस्ति। शिक्षक-सङ्घेन उच्चन्यायालय अस्मिन् विषये याचिका प्रविष्टा कृता। राजकीय- टीजीटी- कलासङ्घस्य महासचिवेन विजयहीरेण उच्चन्यायालये याचिका प्रविष्टा। जनगणना-निदेशकं प्रति प्रतिवेदन-प्रदाने सत्यापि अन्य-जनपदानां परम्परानुसारं कार्यविधिः न सञ्जाता, यस्मात् कारणात् एषा याचिका प्रविष्टा अभवत्। गतेषु दिनेषु कुल्लू- हमीरपुर- जनपद- प्रशासनानां पक्षतः अस्मिन् विषये आदेशाः संशोधिताः आसन्। कुल्लू-चम्बा-हमीरपुरेषु जनपद- प्रशासनेन शिक्षकाः विद्यालय-कार्यान्तरं जनगणना-कार्यं कर्तुम् उक्ताः आसन्। अपरपक्षे, राजकीय- टीजीटी- कलासङ्घेन शिक्षाविभागात् आगामिपरीक्षाणां समय-सारिण्याः समीक्षायाः अभ्यर्थना कृता अस्ति। सङ्घेन जनगणना-कर्तव्यस्य ध्याने अस्मिन् परिवर्तनं कर्तुं कथितम्। शिक्षकाः निर्वाचन- मूल्याङ्कन- कार्यान्तिरम् अधुना जनगणना-कार्ये संलग्नाः सन्ति, येन पाठ्यक्रमस्य पूरणाय अतिरिक्त-समयः लगति। सङ्घस्य प्रदेशाध्यक्षेण सुरेश कौशलेन, उपाध्यक्षेण विजय बरवालेन, महासचिवेन विजय हीरेण च प्रोक्तं यत् अस्मिन् सत्रे निर्वाचनकर्तव्यं, शिक्षामण्डलस्य पत्रमूल्याङ्कनकर्तव्यम्, अधुना जनगणना-कर्तव्यस्य कारणात् शिक्षकेभ्यः परीक्षाणां पाठ्यक्रमपूरणाय पुनरावृत्तये च अतिरिक्तसमयः आवश्यकः वर्तते। तैः कथितं यत् जनगणना सदृशानां राष्ट्रिय-महत्त्व-कार्याणां कृते आवधिक-मूल्याङ्कन-सारिण्यां परिवर्तनं शिक्षक- छात्रयोः द्वयोः हिते वर्तते। सङ्घस्य प्रयासैः हमीरपुर- कुल्लू- जनपदेषु जनगणना-आदेशाः संशोधिताः सन्ति। एतेषु जनपदेषु अंशकालिक-जनगणनायाः स्थाने पूर्णकालिक- जनगणना- कार्यस्य अनुमतिः प्रदत्ता अस्ति।

# हिमाचलप्रदेशस्य चतुर्षु नगरनिगमेषु २९ जून् दिनाङ्के प्राप्स्यन्ति नूतनाः महापौराः (मेयर), उपमहापौराः च

हिमसंस्कृतवार्ताः- शिमला। हिमाचलप्रदेशस्य चतुर्षु नगरनिगमेषु धर्मशाला, पालमपुर, मण्डी, सोलन इत्येतेषु २९ जून् दिनाङ्के नूतनानां महापौराणाम्, उपमहापौराणां च निर्वाचनं भविष्यति। अस्मिन्नेव दिने नवनिर्वाचिताः पार्षदाः पदस्य गोपनीयतायाश्च शपथग्रहणं करिष्यन्ति। राज्यसर्वकारेण जनिताधिसूचनानुसारम् एतेषां नगरनिगमानां प्रथमा उपवेशनसभा २९ जून दिनाङ्के आयोजयिष्यते, यस्यां अध्यक्षस्य उपाध्यक्षस्य च निर्वाचनं सम्पन्नं भविष्यति।

## शपथग्रहणं निर्वाचनप्रक्रिया च-

निर्वाचन- आयोगेन अप्रैल २०२६ तमे वर्षे घोषितानुसारं, १७ मई दिनाङ्के मतदानं सम्पन्नम् अभवत्, ३१ मई दिनाङ्के च निर्वाचनपरिणामाः घोषिताः। अधुना, २९ जून दिनाङ्के नवनिर्वाचिताः पार्षदाः पदस्य शपथं ग्रहीष्यन्ति, यदनन्तरं महापौरस्य उपमहापौरस्य च निर्वाचनं भविष्यति। सम्बन्धितानां मण्डलानां मण्डलाधिपतयः (उपायुक्ताः) एतेषां निर्वाचनानां अध्यक्षतां करिष्यन्ति, प्रथमसभायाः सञ्चालनमपि करिष्यन्ति।

## महापौरपदस्य स्थितिः अभ्यर्थिनश्च

अस्मिन् वारे चतुर्ष्वपि नगरनिगमेषु महापौरपदं 'अनारक्षितं' (सामान्यं) वर्तते। अस्य अर्थः अस्ति यत् कोऽपि योग्यः अभ्यर्थी अस्मै पदाय निर्वाचनं योद्धुं शक्नोति। महापौरस्य निर्वाचनं आगामि-पञ्चवर्षाणां कृते भविष्यति, येन कारणेन महापौरपदस्य सम्भाव्य-अभ्यर्थिनां सङ्ख्यायां वृद्धिः दृश्यते। गते कार्यकाले धर्मशाला- सोलन-नगरनिगमेषु महापौरपदं महिलाभ्यः आरक्षितम् आसीत्।

## निर्वाचनपरिणामाः बहुमतञ्च

नगरनिगमनिर्वाचनेषु भारतीयजनतापार्टी (भाजपा) सोलन, मण्डी, धर्मशाला इत्येतेषु स्थानेषु स्पष्टं बहुमतं प्राप्नोत्। अपरपक्षे, पालमपुर-नगरनिगमे काङ्ग्रेसदलम् अग्रेसरं वर्तते। एषः निर्वाचनपरिणामः आगामि-नगरनिगमानां सञ्चालने राजनैतिकदलानां भूमिकां स्पष्टं करोति।

# वयं शपथं गृह्णीमः... हिमालचप्रदेशस्य २९०८ पञ्चायतेषु प्रधानैः उपप्रधानैश्च गृहीतं शपथम्, मङ्गलवासरादारभ्य कार्यप्रारम्भः






हिमसंस्कृतवार्ताः - शिमला। हिमाचलप्रदेशे सोमवासरे काङ्गड़ा-जनपदं विहाय अवशिष्टेषु ११ जनपदेषु पञ्चायतानां नवनिर्वाचितैः प्रधानैः उपप्रधानैश्च शपथः गृहीतः। प्रत्येकस्मिन् जनपदे मन्त्रिमण्डलस्य (कैबिनेट) मन्त्रिणाम् अथवा विधानसभाध्यक्षस्य अध्यक्षतायाम् एते समारोहाः सम्पन्नाः। लाहौल-क्षेत्रे मुख्य-सचेतकः (चीफ व्हिप) केवलसिंहपठानिया प्रेषितः आसीत्। अस्मिन् वारे नवीना वार्ता एषा आसीत् यत् शिमला-नगरस्य 'पीटरहॉफ' मध्ये आयोजिते समारोहे शपथ-ग्रहणाय शिक्षामन्त्रिणः रोहितठाकुरस्य कर्तव्यं (ड्यूटी) निर्धारितम् आसीत्, परन्तु शिमला-नगरे उपस्थितत्वात् मुख्यमन्त्री सुक्खू अपि कार्यक्रमे सम्प्राप्तः, तेन नशामुक्तेः शपथः कारितः। सोमवासरे प्रायः २९०८ पञ्चायतानां नवनिर्वाचिताः प्रधानाः उपप्रधानाश्च पदस्य गोपनीयतायाश्च शपथं ग्राहिताः।

## अनेन सहैव पञ्चायतेषु सार्ध-चतुर-मासेभ्यः नियोजिताः प्रशासकाः पञ्चायत्-कार्येभ्यः मुक्ताः सञ्जाताः

नवनिर्वाचिताः प्रधानाः उपप्रधानाश्च मङ्गलवासरादारभ्यः स्व-पदभारं सम्भालयिष्यन्ति। शिमला-नगरे शिक्षामन्त्रिणा रोहितठाकुरेण शपथः कारितः, यदा हि अन्येषु जनपदेषु विधानसभाध्यक्षेण अन्यैः मन्त्रिभिश्च शपथः कारितः। लोकनिर्माणविभाग (PWD)-मन्त्रिणं विक्रमादित्यसिंहं विहाय अन्येषां सर्वेषां मन्त्रिणां कर्तव्यानि निर्धारितानि आसन्। विक्रमादित्यसिंहः वैयक्तिक-व्यग्रतायाः कारणात् उपलब्धः नासीत्। चम्बा-जनपदे विधानसभाध्यक्षः कुलदीपसिंहपठानिया, ऊना-जनपदे उप-मुख्यमन्त्री मुकेशअग्निहोत्री, सोलन-जनपदे स्वास्थ्यमन्त्री कर्नलधनीरामशाण्डिलः तथा कुल्लू-लाहौल-स्पीति-क्षेत्रयोः निर्वाचितेभ्यः प्रधानेभ्यः उपप्रधानेभ्यश्च शपथ-ग्रहणाय कृषिमन्त्रिणः चन्द्रकुमारस्य दायित्वं निर्धारितम् आसीत्। सिरमौर-जनपदे उद्योगमन्त्री हर्षवर्धनचौहानः, किन्नौर-जनपदे राजस्वमन्त्री जगत्सिंहनेगी, मण्डी-जनपदे पञ्चायतीराजमन्त्री अनिरुद्धसिंहः, बिलासपुर-जनपदे प्राविधिक-शिक्षामन्त्री राजेशधर्माणी तथा आयुषमन्त्री यादविन्द्रगोमा च शपथं कारितवन्तः।

## काङ्ग्ड़ा-जनपदे एतस्मात् कारणात् स्थगितः कार्यक्रमः

प्रधान-उपप्रधानाणां शपथ-ग्रहणाय एतादृशाः कार्यक्रमाः काङ्गड़ा-जनपदं विहाय अन्येषु सर्वेषु जनपदेषु आयोजिताः। काङ्गड़ा-जनपदस्य प्रधानेभ्यः उपप्रधानेभ्यश्च मुख्यमन्त्री सुक्खू १८ जून दिनाङ्के शपथं कारयिष्यति, यतो हि मुख्यमन्त्रिणः अद्य देहली-प्रवासः प्रस्तावितः अस्ति। अतः, काङ्गड़ा-जनपदस्य शपथ-ग्रहणसमारोहः दिनत्रयानन्तरं निर्धारितः अस्ति।

## २७ जून दिनाङ्के पञ्चायतानां प्रथमोपवेशनम्

प्रदेशस्य सर्वेषामपि ग्रामपञ्चायतानां प्रथमा सभा २७ जून दिनाङ्के आयोजयिष्यते। अस्मादेव दिनात् आरभ्य प्रधान-उपप्रधान-वार्डसदस्येभ्यः मानदेयं प्राप्तुं प्रारप्स्यते। वार्ड सदस्येभ्यः प्रथमायां सभायां प्रधानेन शपथं ग्राहयिष्यन्ते। पञ्चायत्-प्रधानानाम् उपप्रधानानां च शपथ-ग्रहणानन्तरं अधुना ग्रामीणक्षेत्रेषु अवरुद्धानां विकासकार्याणाम् अपि गतिः प्राप्स्यते। केन्द्र-राज्यसर्वकाराभ्यां प्रायोजितानां योजनानाम् अन्तर्गतं ग्रामीणक्षेत्रेभ्यः आयव्ययकं (बजट) अपि निर्गमिष्यति।

# हिमाचलप्रदेशे २१ जून पर्यन्तं वृष्टि-करकापातयोः (ओलावृष्टि) पूर्वसूचना (अलर्ट) प्रसारिता, तापात् प्राप्स्यते विश्रामः, झञ्झावातः अपि चलिष्यति

हिमाचलप्रदेशे ऋतुचक्रं परिवर्तितम् अस्ति। सोमे अपि राजधान्या सह सम्पूर्णे प्रदेशे वृष्टिः करकापातः च सञ्जातः। मङ्गलवासरात् ऋतुः पुनः एकवारं परिवर्तनं गमिष्यति। शिमला-स्थितस्य ऋतुविज्ञानकेन्द्रस्य पूर्वानुमानस्य अनुसारं सम्पूर्णे सप्ताहे प्रदेशे ऋतोः स्वभावः परिवर्तितः एव स्थास्यति। १६ तः २१ जून पर्यन्तं प्रदेशस्य विविधेषु क्षेत्रेषु मन्दात् मध्यमा वृष्टिः भवितुं सम्भावना अस्ति, यदा तु १८ तथा १९ जून दिनाङ्कयोः बहुषु जनपदेषु गर्जन-कम्पनैः, तीव्रवायुना, करकापातेन (ओलावृष्टि) च सह पूर्वसूचना (चेतावनी) प्रसारिता अस्ति।

# नागपुरे सांस्कृतिक-कृत्रिम-बुद्धिमत्ता- ग्रीष्मकालीन-कार्यशालायाः शङ्खनादः, संस्कृत-आधुनिक-तन्त्रज्ञानयोः समन्वयेन विकसितं भविष्यति भारत-केन्द्रितम् 'एआई'



**हिमसंस्कृतवार्ताः- नागपुरम्।**
केन्द्रीय- संस्कृत- विश्वविद्यालयस्य (नवदेहली) तथा 'इम्मवर्स इनोवेशन्स प्राइवेट लिमिटेड' (नागपुरम्) इत्यनयोः संयुक्त-तत्वावधाने भारतात् सांस्कृतिक- कृत्रिम-बुद्धिमत्तायाः निर्माणम् ("Building Civilizational AI from Bharat") इति विषयिणी २१ दिवसीय- ग्रीष्मकालीन- विद्यालय- कार्यशालायाः भव्यः शुभारम्भः १५ जून २०२६ दिनाङ्के नागपुरे अभवत्। ५ जुलाई २०२६ पर्यन्तं प्रवर्तिष्यमाणे अस्मिन् राष्ट्रिय- ज्ञान- महोत्सवे देशस्य २३ प्रतिष्ठित- उच्च- शिक्षण- संस्थाभ्यः चयनिताः ३० मेधाविनः छात्र- छात्राः सहभागित्वं कुर्वन्तः सन्ति। एते प्रतिभागिनः 'सीएसयू' (CSU), 'जेएनयू' (JNU), देहली-विश्वविद्यालयः, सम्पूर्णानन्द- संस्कृत- विश्वविद्यालयः इत्यादिभ्यः संस्थाभ्यः समायाताः, ये संस्कृत-'एआई'-इत्यनयोः अन्तःसम्बन्धं ज्ञात्वा प्रत्यक्षं प्रशिक्षणं प्राप्स्यन्ति। कार्यक्रमस्य अध्यक्षता केन्द्रीय-संस्कृत-विश्वविद्यालयस्य कुलपतिः प्रो. श्रीनिवासवरखेड़ी महोदयेन कृता। मुख्यातिथिरूपेण कविकुलगुरु-कालिदास- संस्कृत- विश्वविद्यालयस्य पूर्व- प्रथमकुलपतिः प्रो. पंकजचांदे उपस्थितः आसीत्। विशिष्ट- अतिथिरूपेण 'इम्मवर्स इनोवेशन्स' संस्थायाः संस्थापकः मुख्य-कार्यकारी-अधिकारी च आर. रामकृष्णनः, सह-संस्थापिका प्रीतिरामकृष्णनः, ग्रीष्मकालीन- विद्यालयस्य समन्वयकः केन्द्रीय- योजना- निदेशकश्च प्रो. मधुकेश्वरभट्टः, डॉ. योगेन्द्रदीक्षितः, डॉ. अमृताकौरः, स्थानीय- समन्वयकः अनुरागश्रीवास्तवः च उपस्थिताः आसन्। ग्रीष्मकालीन-विद्यालयस्य समन्वयकेन प्रो. मधुकेश्वरभट्टेन स्वागतभाषणं यच्छता २१ दिवसीय- कार्यशालायाः प्रतिवेदनम् उपस्थापितम्।

## संस्कृत- 'AI' इत्यनयोः समन्वयः अद्यतनस्य महती आवश्यकता- कुलपतिः प्रो. श्रीनिवासवरखेड़ी

कार्यक्रमस्य अध्यक्षतां कुर्वता केन्द्रीय- संस्कृत-विश्वविद्यालयस्य कुलपतिः प्रो. श्रीनिवासवरखेड़ी महोदयेन भारतसर्वकारस्य महत्त्वाकाङ्क्षिण्याः प्रवृत्तेः 'ज्ञानभारतम्' इत्यस्याः विशेषरूपेण उल्लेखः कृतः। तेन स्वकीय-अध्यक्षीय-उद्बोधने प्रतिपादितं यत्- "एआई (AI) तथा संस्कृतस्य मध्ये समन्वयनं स्थापयितुं कश्चन कठिनः आह्वानपूर्णश्च विषयः वर्तते, परन्तु अस्यां दिशि पदक्षेपः गतदिने तनस्य महती आवश्यकता अस्ति। यद्यपि अधुना अस्माकं क्षमताः सीमिताः प्रतीयन्ते, तथापि अस्य संसाधनानि अतीव सकारात्मकानि समायान्ति। योजनां विरच्य अस्मिन् विषये सद्यः कार्यप्रारम्भः आवश्यकः अस्ति।" तेन एतदपि रेखाङ्कितं यत् विश्वविद्यालयीयस्तरे एतादृशस्य व्यावहारिक-प्रशिक्षणस्य सम्मेलनस्य च आयोजनं संस्कृतजगतः कृते कश्चन मील-प्रस्तरः सिद्धः भविष्यति।

## एआई-युगस्य भागः भवेत् भारतस्य प्राचीना ज्ञानसम्पदा- प्रो. पंकजचांदे

मुख्यातिथिना प्रो. पंकजचांदे महोदयेन स्वकीय-सारगर्भिते सम्बोधने एषः प्रसङ्गः प्राचीन- ज्ञानपरम्परायाः आधुनिक-तन्त्रज्ञानस्य च सङ्गमस्य एकः महत्त्वपूर्णं सोपानम् इति प्रतिपादितम्। तेन कथितं यत्- "एतद् केवलम् एकः 'इन्टर्नशिप' कार्यक्रमः नास्ति, अपि तु छात्रान् राष्ट्रस्य एकस्मिन् महति ज्ञानयज्ञे सहभागिनः विधातुं प्रयासः अस्ति। गतदिने यदा कृत्रिम-बुद्धिमत्ता (AI) वैश्विक- भविष्यं नवीनं रूपं यच्छन्ती अस्ति, तदा भारतस्य शास्त्राणि, भाषाः, बौद्धिकी च विरासत- परम्परा अपि अस्य युगस्य अभिन्नः भागः भवेयुः।"
प्रो. चान्दे महोदयेन 'इम्मवर्स इनोवेशन्स' संस्थया विकसितस्य Bharatiya GPT™ इत्यस्य भृशं प्रशंसा कृता, यस्य प्रशंसा प्रधानमन्त्रिणा नरेन्द्रमोदिना स्वकीय-'मन की बात' (१३१ तमे संस्करगे) तथा 'India AI Summit 2026' इति वैश्विक-मञ्चे अपि विहिता आसीत्। तेन चिन्तां प्रकटीकुर्वता उक्तं यत् भारतस्य प्रायः १ कोटि परिमितेषु उपलब्ध-पाण्डुलिपिषु ३.५ लक्षतः अपि न्यूनाः पाण्डुलिपयः अङ्कीकृताः (डिजिटल) भवितुं शक्ताः। केवलं 'स्कैनिंग'-कार्यं पर्याप्तं नास्ति; प्राचीनानां लिपीनां परिचयं (OCR) तथा क्षतिग्रस्तानां पाठानां पुनरुद्धारं कृत्वा तान् 'AI-Ready Data' (एआई-सज्ज-आङ्किकेषु) परिवर्तयितुं सर्वतोगम्भीरं आह्वानम् अस्ति। तेन छात्रेभ्यः उक्तं यत् ते ज्ञान-तन्त्रज्ञानयोः मध्ये सुदृढः सेतुः भवेयुः।

## भारतस्य भाषामयीं ज्ञानगतां च विविधतां बोधिष्यति 'एआई'

विशिष्ट-अतिथिना 'इम्मवर्स इनोवेशन्स' इत्यस्य 'सीईओ' आर. रामकृष्णनेन प्राविधिक-दृष्टिकोणं प्रस्तुवता कथितं यत् अस्माकं सांस्कृतिक-धरोहरे ज्ञानस्य असीमितः भण्डारः वर्तते। 'इम्मवर्स एआई' इत्यस्य लक्ष्यं कस्यचित् एतादृशस्य 'सिविलाइजेशनल एआई' (सांस्कृतिक-कृत्रिम- बुद्धिमत्तायाः) विकासः अस्ति, यः भारतस्य भाषामयीं ज्ञानगतां च विविधतां पूर्णतया सूक्ष्म-सटीकतया च अवबोधितुं शक्नुयात्।
कार्यशालायाः समन्वयकेण विज्ञापितं यत् अस्मिन् २१ दिवसीय-प्रशिक्षणे भारतीय-ज्ञान-प्रणाली (IKS), ग्रन्थानां डिजिटलीकरणं, भाषा- प्रौद्योगिकी, 'मशीन लर्निंग' तथा 'एआई'- आधारित- नवाचारेषु व्यावहारिकाः सत्राः परियोजना- आधारिताः गतिविधयश्च आयोजयिष्यन्ते। मञ्चसञ्चालनम् अमयवैद्येन कृतम्। धन्यवाद- आभारप्रकटनं आस्थाचौहानेन विहितम्। अस्मिन् अवसरे शोधार्थिनः, प्राविधिक- दलस्य सदस्याश्च अपि उपस्थिताः आसन्।

# Census 2027- हिमाचलप्रदेशे जनगणनायाः प्रथमचरणं १६ दिनाङ्कतः, ३३ आधिकारिक-प्रश्नानां माध्यमेन सङ्ग्रहीष्यते सूचना

हिमसंस्कृतवार्ताः- शिमला। हिमाचलप्रदेशे जनगणना-२०२७ इत्यस्याः प्रथमचरणस्य गृह-सूचीकरणस्य गृहाणां च गणनायाः औपचारिकः आरम्भः १६ जून दिनाङ्कतः विधीयते। एतद् महत्त्वपूर्णं चरणं १५ जुलाई पर्यन्तं सञ्चालितं भविष्यति। प्रदेशस्य सर्वेषु जनपदेषु प्रगणकानां पर्यवेक्षकाणां च प्रशिक्षणं १३ जून पर्यन्तं सफलतापूर्वकं पूर्णं सञ्जातम्। ऑनलाइन- पोर्टल- माध्यमेन 'स्व-गणनायाः' अवधिः १५ जून दिनाङ्कस्य रात्रौ १२ वादनं यावत् निर्धारिता आसीत्। जनगणना-निदेशालयेन सूचना प्रदत्ता यत् अस्मिन् वारे जनगणना पूर्णतः अङ्कीय (डिजिटल) माध्यमेन क्रियते। प्रगणकाः सूचना- सङ्ग्रहणाय 'एचएलओ' (HLO) मोबाइल- अनुप्रयोगस्य उपयोगं करिष्यन्ति।
यैः नागरिकैः १ तः १५ जून २०२६ पर्यन्तं ऑनलाइन- माध्यमेन स्वगणना पूर्णा कृता अस्ति, तैः स्वकीय-स्वगणना-परिचयसङ्ख्या (स्वगणना आईडी) प्रगणकेभ्यः प्रदातव्या भविष्यति। यदि केनापि कारणेन नागरिकाः स्व-गणनां कर्तुं न शक्ताः, तर्हि प्रगणकाः १६ जूनतः १५ जुलाई २०२६ पर्यन्तं गृहं गृहं गत्वा सूचनां सङ्ग्रहीष्यन्ति। अस्मिन् अवधौ प्रगणकाः ३३ आधिकारिक-प्रश्नानां माध्यमेन विवरणं प्राप्स्यन्ति। एतेषु प्रश्नेषु गृहं, परिवारः, जलं, विद्युत्, शौचालयः, अन्नं तथा गृही-उपकरणानाम् उपलब्धता सदृश्यः मूलभूत-आवश्यकताः समाविष्टाः सन्ति। एषा सूचना देशस्य विकासयोजनानां कृते महत्त्वपूर्णा भविष्यति। जनगणना-कार्य-निदेशालयेन सर्वेभ्यः नागरिकेभ्यः अस्मिन् राष्ट्रिय-कार्ये पूर्ण-सहयोगं प्रदातुम् अनुरोधः कृतः।

## गृहम् आगतस्य प्रगणकस्य परिचयं परिचयपत्रे विद्यमानं 'क्यूआर-कोड' स्कैन कृत्वा कुर्वन्तु

जनसुरक्षां निश्चितं विधातुं निदेशालयेन स्पष्टाः निर्देशाः निर्गताः सन्ति। गृहम् आगतस्य प्रगणकस्य परिचयार्थं सामान्याः नागरिकाः तस्य परिचयपत्रे विद्यमानं 'क्यूआर-कोड' स्कैन कृत्वा सत्यतायाः परीक्षणं कर्तुं शक्नुवन्ति। एषः पदक्षेपः नागरिकाणां सुरक्षायाः विश्वासस्य च स्थिरीकरणाय आवश्यकः वर्तते। निदेशालयेन नागरिकेभ्यः कस्यापि भ्रामक-सूचनायाः सावधानाः भवितुम् प्रार्थना कृता अस्ति। निदेशालयेन एतदपि स्पष्टीकृतं यत् जनगणना-काले कस्यापि प्रकारकस्य वित्तकोष-विवरणम्, 'ओटीपी' अथवा कोऽपि वित्तीय-प्रमाणपत्रं न याच्यते। नागरिकाः एतादृश्याः कस्यापि याचनायाः उपरि ध्यानं न दद्युः। जनगणनासम्बद्धिनीं कस्यापि आधिकारिक-सूचनायै सहायतायै च १८५५ इति साहाय्यक-दूरभाष- सङ्ख्यायां सम्पर्कं कर्तुं शक्यते। एषा सङ्ख्या नागरिकाणां शङ्कानां समाधानं विधास्यति समीचीनं ज्ञानं च प्रदास्यति।

# मनाली-लेह मार्गः भविष्यति आधुनिकः सर्वर्तु-मार्गः दीर्घतापि न्यूनीभविष्यति, हिमाचलप्रदेशाय प्राप्स्यन्ते महन्तः लाभाः, यात्रा केवलं षड्-होराणां स्थास्यति



## बारालाचा-ला, लाचुलुंग-ला तथा तंगलंग-ला क्षेत्रेषु प्रस्तावित-सुरङ्गत्रयस्य 'डीपीआर' सज्जं करोति 'एनएचआईडीसीएल'

हिमसंस्कृतवार्ताः -शिमला। मनाली-लेह-महामार्गे (हाइवे) प्रस्तावितानां त्रयाणां आन्तर्भौमिकमार्गाणां निर्माणानन्तरं एषः मार्गः आधुनिकः सर्वर्तु-मार्गः (All-weather road) भविष्यति तथा च एषः देशस्य सर्वोच्चेषु मोटर-चालन-योग्यमार्गेषु समाविष्टः भविष्यति। सुरङ्ग-निर्माणेन मनाली-नगरतः लेह-नगरस्य मध्यवर्तिनी दीर्घता पञ्चाशत् (५०) किलोमीटर् परिमिता न्यूनीभविष्यति। अनेन सहैव यात्रा-अवधिः अपि दश-होराभ्यः (१० घण्टे) न्यूनीभूत्वा षड्-होराः (६ घण्टे) यावत् एव स्थास्यति। मनाली-लेह-राष्ट्रिय-महामार्गं देशस्य अत्यन्तम् आधुनिकेषु आवर्षं च सञ्चालितेषु पर्वतीय-मार्गेषु स्थानं प्रदातुं केन्द्रसर्वकारेण अस्मिन् विषये महत् पदक्षेपः उत्थापितः। अस्य अन्तर्गतम् अस्मिन् मार्गे बारालाचा-ला, लाचुलुंग-ला तथा तंगलंग-ला इत्येतेषाम् अधः त्रयाणां नूतन-कन्दराणां निर्माणस्य योजना वर्तते, एतासां 'डीपीआर' (DPR) निर्माणाय अपि कार्यं प्रारब्धम् अस्ति। एतासां कन्दराणां निर्माणेन हिमाचलप्रदेश-लद्दाख-क्षेत्रयोः मध्ये प्रत्येकस्मिन् ऋतौ यात्रा सुरक्षिता भविष्यति।

एतासां महत्त्वाकाङ्क्षिणीनां सुरङ्ग-परियोजनानां विस्तृत-परियोजना-प्रतिवेदनं (DPR) सज्जं कर्तुं उत्तरदायित्वं 'नेशनल हाईवेज एंड इंफ्रास्ट्रक्चर डेवलपमेंट कॉरपोरेशन लिमिटेड' (NHIDCL) इत्यस्मै समर्पितम् अस्ति। केन्द्रीय-सडक-परिवहन-एवं-महामार्ग-मन्त्री नितिनगडकरी महोदयः सद्यः एव एतासां तिसृणां सुरङ्गाणां विषये सूचनां साक्षात्कृतवान्, उक्तवान् च आसीत् यत् 'डीपीआर' सज्जतायाः प्रक्रिया प्रचलन्ती अस्ति। वर्ष २०२१ मध्ये 'एनएचआईडीसीएल' संस्थायाः पक्षतः एतासु परियोजनासु प्रारम्भिकं कार्यं प्रारब्धम् आसीत्। यद्यपि एषः मार्गः 'सीमामार्गसङ्घटनम्' (BRO) इत्यस्य सामरिक-मार्ग-तन्त्रस्य (Strategic network) भागः अस्ति, तथापि प्राविधिक-योजनायाः 'डीपीआर'-निर्माणस्य च कार्यम् 'एनएचआईडीसीएल' पश्यति। अन्तिम-निर्माण-संस्थायाः चयनं केन्द्रसर्वकारस्य अनुमतेः पश्चात् एव विधास्यते।

प्रस्तावित-योजनानुसारं बारालाचा-ला इत्यस्य अधः प्रायः १३.२ किलोमीटर्, लाचुलुंग-ला इत्यस्य अधः प्रायः १४.७ किलोमीटर् तथा तंगलंग-ला इत्यस्य अधः प्रायः ७.३ किलोमीटर् दीर्घाणाम् आन्तर्भौमिकमार्गाणां निर्माणं करणीयम् अस्ति। एतेषाम् आन्तर्भौमिकमार्गाणां निर्माणानन्तरं वाहनानि हिमपातं प्रतिकूल-ऋतुं च प्रभावितान् उच्च-पर्वत-मार्गान् पारं विना साक्षात् आन्तर्भौमिकमार्गाणां माध्यमेन गन्तुं शक्ष्यन्ति। अनेन यात्रा अत्यधिकं सुरक्षिता, तीव्रा, सुविधायुक्ता च भविष्यति। प्रस्तावितानां आन्तर्भौमिकमार्गाणां निर्माणे पूर्णे सति मनाली-लेह-मार्गस्य दूरी प्रायः ५० किलोमीटर् यावत् न्यूनीभवितुं शक्नोति; यदा हि वर्तमानकाले विद्यमाना १० होराणां यात्रा न्यूनीभूत्वा प्रायः ६ होराणां स्थास्यति। अनेन यात्रिकेभ्यः आवर्षं श्रेष्ठा मार्ग-सुविधा उपलप्स्यते तथा च ऋतोः कारणात् उत्पन्नाः बाधाः अपि अतीव न्यूनाः भविष्यन्ति।

एताभिः परियोजनाभिः प्रदेशाय महान् लाभः प्राप्स्यते इति आशा वर्तते। आवर्षं मार्ग-सम्पर्कस्य उपलब्ध्या स्थानीय-जनानाम् आवागमनं सरलं भविष्यति तथा च सुदीर्घकाल-यावत् मार्ग-अवरोधस्य समस्यायां न्यूनता आगमिष्यति। श्रेष्ठ-सम्पर्क-माध्यमेन (Connectivity) मनाली, लाहौल, स्पीति तथा लेह-क्षेत्रेषु पर्यटन-गतिविधिभ्यः अपि नवीना शक्तिः प्राप्स्यते। उपहारगृह (होटल)-उद्योगः, होम-स्टे (गृह-वासः), टैक्सी-सञ्चालनम्, विश्रामगृह-व्यवसायः (रेस्टोरेंट) तथा स्थानीय-व्यापारः च अस्मात् साक्षात् लाभं प्राप्स्यन्ति।

अपरपक्षे, कृषकाः उद्यानपालकाश्च (बागवान) स्व-उत्पादनानि आपणं (बाजार) प्रति नेतुं श्रेष्ठं तीव्रं च परिवहन-सौकर्यं प्राप्स्यन्ति। अपरतः, मार्ग-अवसंरचनायाः (Infrastructure) विस्तारेण स्थानीय-यूनां कृते जीविकायाः स्वजीविकायाः च नवीनाः अवसराः अपि सृजिताः भविष्यन्ति। एतदपि महत्त्वपूर्णं वर्तते यत् सामरिक-दृष्ट्या अपि मनाली-लेह-मार्गः देशस्य अत्यन्तं महत्त्वपूर्णेषु महामार्गेषु अन्यतमः अस्ति। एषः मार्गः लद्दाख-क्षेत्रस्य सीमावर्ती-भागेभ्यः सेनायाः रसद-सामग्री, सैन्य-उपकरणानां, सैनिकानां च आवागमनस्य प्रमुखं माध्यमम् अस्ति। नूतनानाम् आन्तर्भौमिकमार्गाणां निर्माणानन्तरं सेनायाः आपूर्ति-व्यवस्था अत्यधिकं तीव्रा, सुरक्षिता, ऋतोः उपरि च न्यूना आश्रिता भविष्यति। चीन-सीमायाः समीपे स्थितेषु संवेदनशीलेषु क्षेत्रेषु प्रत्येकस्मिन् ऋतौ प्राप्यतां निश्चितं विधातुं एताः परियोजनाः अत्यन्तं महत्त्वपूर्णाः मन्यन्ते। सर्वथा अटल-सुरङ्गस्य (अटल टनल), जोजिला-सुरङ्गस्य तथा निर्माणाधीन-शिंकू-ला-सुरङ्गस्य परम्परानुसारं बारालाचा-ला, लाचुलुंग-ला तथा तंगलंग-ला सुरङ्ग-परियोजनानां मूर्तरूप-स्वीकरणेन मनाली-लेह-राष्ट्रिय-महामार्गः देशस्य सर्वाधिक-आधुनिकेषु, सुरक्षितेषु, सर्व-ऋतु-पर्वतीय-मार्गेषु समाविष्टः भविष्यति।

# १३७ पञ्चायतेभ्यः पुरस्कारं दास्यति सर्वकारः, जनप्रतिनिधीनां निर्विरोधनिर्वाचने ३४.२५ कोटिरूप्यकाणि प्राप्स्यन्ते

हिमाचलसर्वकारः सम्मत्या 'पञ्चपरमेश्वर' (प्रतिनिधि) चितवद्भिः निर्विरोधनिर्वाचितपञ्चायतेभ्यः पुरस्कारं दास्यति। इयं पुरस्कारराशिः एतेषु पञ्चायतेषु केवलं विकासकार्याणाम् उपरि एव व्ययीकरणीया अस्ति, तथा च इयं राशिः पञ्चायतेभ्यः प्राप्यमाणायाः सामान्यविकासराशेः अतिरिक्ता भविष्यति। हिमाचलप्रदेशे आयोजितेषु पञ्चायतनिर्वाचनेषु १३७ पञ्चायतेषु निर्विरोधं पञ्चायतप्रतिनिधयः चिताः सन्ति। एतेभ्यः पञ्चायतेभ्यः पुरस्काररूपेण सुक्खू-सर्वकारः विकासकार्यार्थं आहत्य ३४ कोटि २५ लक्षरूप्यकाणि (३४.२५ कोटि) प्रदास्यति। अस्य उद्घाटनं पञ्चायतीराजमन्त्रिणा अनिरुद्धसिंहेन कृतम्। तेन उक्तं यत् पञ्चायतानां सुदृढीकरणस्य दृष्ट्या प्रदेशसर्वकारेण पञ्चायतीराज-अधिनियमे नियमेषु च बहवः सकारात्मानः परिवर्तनाः कृताः सन्ति। निर्विरोधपञ्चायतचयनस्य प्रोत्साहनराशिः १० लक्षरूप्यकेभ्यः प्रवर्ध्य २५ लक्षरूप्यकाणि कृता अस्ति। अस्यैव सुपरिणामः अस्ति यत् अस्मिन् वारे १३७ पञ्चायताः निर्विरोधं निर्वाचिताः भूत्वा आगताः सन्ति।

# "लौकिकन्यायकोशः"

# "अन्धकुपन्यायः"

एकः सत्पुरुषः एकम् अन्धम् उक्तवान्- अनेन मार्गेण पुरतः गच्छ इति। परं स अन्धः तत् अश्रुत्वा अयोग्येन मार्गेण गत्वा किञ्चित् कालानन्तरम् एकस्मिन् कूपे पतितः।

तथैव मनुष्यः सन्मार्गं विहाय कुमार्गम् आश्रयति चेत् अन्ध इव सोऽपि कूपम् एव पतितः भवेत्। एतादृशीं स्थितिं बोधयितुम् अस्य न्यायस्य प्रयोगः भवति।

**डा. वर्षा प्रकाश टोणगांवकर पुणे / महाराष्ट्रम्**



# वार्तासंवादः

**हिमसंस्कृतवार्ताः, ईदरधीरजः,हैदराबादः**

**नन्दिनी-** नमो वः। गतदिने तने वार्ता-कार्यक्रमे स्वागतं व्याहरामि। नमस्ते काव्ये।

**काव्या -** नमस्ते नन्दिनि। मया गतदिने एका रोचिका वार्ता पठिता।

मुम्बापुर्यां पुरुषेण तन्त्रांश-माध्यमेन पञ्चाशदधिक-त्रिशत- रूप्यकैः केशकर्तनस्य पञ्जीकरणं कृतम्। परन्तु विलम्बात् तेन स्थानीय-आपणे षष्टि-रूप्यकैः एव केशकर्तनं प्राप्तम्। अतः सुलभतायाः मूल्यं कियत् इति जनेषु चर्चा आरब्धा।

**नन्दिनी-** आम्, सत्यम्। नागरिकैः सुलभतायै एव अधिकं धनं दत्तम्।

इदानीं द्वितीया वार्ता युक्रेनदेशात् प्राप्ता अस्ति। तत्र पक्षिभिः त्यक्तैः यन्त्र-तन्तुभिः नीडानि निर्मितानि। युद्धक्षेत्रे पतिताः चालकरहित-विमानानां प्रकाशिकरज्जवः पक्षिभिः उपयुक्ताः।

**काव्या-** अहो, प्रकृत्या अपि नूतन-तन्त्रांशैः सह सामञ्जस्यं स्थापितम्!

देहली-नगरस्य अपरा वार्ता मया दृष्टा अस्ति। तत्र एकया महिलया उक्तं यत् भारते सामाजिक-व्यवस्था नियम- भञ्जकानाम् एव साहाय्यं करोति। ये जनाः नियमानाम् उल्लङ्घनं कृतवन्तः सन्ति, ते एव लाभं प्राप्तवन्तः सन्ति, अतः एव अत्र नागरिकबोधस्य अभावः अस्ति इति तया स्पष्टीकृतम्।

**नन्दिनी-** तत् कटु-सत्यं तया प्रकाशितम्। वयं विदेशेषु नियमान् पालयामः किन्तु स्वदेशे न।

अन्तिमा वार्ता अमेरिकादेशात् आगता अस्ति। तत्र एकया मात्रा स्वशिशुभ्यः राज्यानां नामानि दत्तानि। तया स्वपुत्राणाम् अमेरिकादेशस्य राज्यानां नामभिः एव नामकरणं कृतम्।

**काव्या-** अहो! अतीव विचित्रा एषा वार्ता।

जनाः स्वबालकेभ्यः कीदृशानि नामानि दत्तवन्तः सन्ति इति आश्चर्यकरम्। गतदिने तनः कार्यक्रमः अत्रैव समाप्तः जातः।

**नन्दिनी-** आम्, धन्यवादः काव्ये। श्वः पुनः मेलिष्यामः।





हिमसंस्कृतवार्ता
असमप्रदेशीयः
विज्ञानशिक्षकः, नारदोपाध्यायः

# काचिद् रमणीया कथा

एकस्मिन् वने कश्चन शृगालः निवसति स्म, तस्य नाम चण्डरवः इति। कदाचित् सः बुभुक्षया आहारम् अन्विष्य ग्रामम् आगतवान्। सहसा तत्र आगतं तं दृष्ट्वा तत्रत्याः शुनकाः भषन्तः च तस्य समीपम् आगतवन्तः। तान् शुनकान् दृष्ट्वा सः चण्डरवः भीत्या ततः धावितुम् उद्युक्तः अभवत्। ते शुनकाः अपि सत्वरं हि तस्य अनुसरणं कृतवन्तः। प्राणभयात् सः शीघ्रं धावन् मार्गसमीपस्थं कस्यचन रजकस्य गृहं प्रविष्टवान्। तत्र नीलवर्णरसेन पूर्णम् एकं बृहद्भाण्डम् आसीत्। शुनकेभ्यः आत्मानं गोपायितुं, सः तस्मिन् एव भाण्डे पतितवान्। किञ्चिदनन्तरं सः भाण्डतः बहिरागतः। तावता तस्य समग्रं शरीरं नीलवर्णमयं सञ्जातमासीत्। तम् अप्राप्य शुनकाः अपि इतस्ततः अभवन्। सः चण्डरवः इतस्ततः अटन् कथञ्चिद् वनं प्रविष्टवान्।

वनस्थाः मृगादयः अदृष्टपूर्वं अद्भुतं प्राणिनं तम् अवलोक्य, भीताः सन्तः च इतस्ततः पलायनम् अकुर्वन्। तदा सः तान् समाश्वास्य उक्तवान्- " भो! प्राणिनः! भीतिः मास्तु। भवतां वन्यप्राणिनां सर्वेषां संरक्षणार्थमेव भगवता ब्रह्मणा अहमत्र प्रेषितोऽस्मि। अतः इतः परम् अहमेव भवतां राजा स्याम्, अद्यारभ्य भवद्भिः सर्वैः ममाज्ञा यथातथं पालनीया " इति।ततः तत्रत्याः सिंहः, गजः, व्याघ्रः आदयः सर्वेऽपि वन्यपशवः तस्य वचनम् अङ्गीकृतवन्तः। एवं सः तत्रत्यः राजा अभवत्, अन्ये सर्वे तस्य वशगाः च अभवन्। तदनन्तरं बलवन्तः सिंहादयः मृगादिकं निर्बलं पशुं मारयित्वा, तन्मांसं तस्य पुरतः स्थापयितुं आरब्धन्तः। एवं सः आनन्देन खादतामोदता च वने अतिष्ठत्। एवं सुखेन जीवतः तस्य एकदा सहसा विपर्ययः आगतः। तदा सः सभायाम् उपविष्टवान् आसीत्। अन्ये सभासदः पशवः तस्य पार्श्वे आसन्। अकस्मात् तेन दूरक्षेत्रतः शृगालसमूहस्य कोलाहलः श्रुतः, स्वमित्राणां ध्वनिं श्रुत्वा महान् आनन्दः अनुभूतः च। तद्ध्वनिकारणतः तस्य शरीरं पुलकितं जातम्। तदा आनन्दातिरेकेण, नेत्रे निमील्य, उत्थाय च सः तारस्वरेण विरौतुम् आरब्धवान्। "अहो, एषः तु तुच्छः शृगालः एव, न वा ब्रह्मणा प्रेषितोऽयम्" इति तस्य वञ्चनां तत्रत्याः सर्वे सम्यक् ज्ञातवन्तः। ततः एकेन एव प्रहारेण तं मारितवन्तः।

इतीयं कथा विष्णुशर्मणा कृते पञ्चतन्त्रकथापुस्तके उपलभ्यते। अनेन ज्ञायते यत् कोऽपि मनुष्यः अन्येषां पुरतः यादृशीमपि वञ्चनां कुर्यान्नाम, एकस्मिन् दिने जनसमूहस्य पुरतः तद्वञ्चनास्वरूपं, अथवा तन्नाटकस्य वास्तविकस्वरूपम् अवश्यं प्रकटीभवेदेव इति।

# आर.एस.एस. (RSS) सङ्घटनाय पञ्जीकरणस्य आवश्यकता नास्ति, कर्नाटकस्य गृहमन्त्रिणे प्रियाङ्क-खडगे महोदयाय मोहनभागवतस्य उत्तरम्



हिमसंस्कृतवार्ता। कर्नाटकस्य गृहमन्त्रिणा प्रियाङ्क-खडगे महोदेन राष्ट्रियस्वयंसेवकसङ्घात् (आर.एस.एस.) पारदर्शितायाः याचना कृता, येन नूतनः राजनैतिकविवादः उत्पन्नः। अस्य विवादस्य मध्ये आर.एस.एस. सरसङ्घचालकः मोहनभागवतः सोमवासरे अवदत् यत् सङ्घटनाय कस्यापि पञ्जीकरणस्य आवश्यकता नास्ति। आर.एस.एस. सङ्घटनत्वेन पञ्जीकृतं कर्तुं क्रियमाणानां याचनानाम् उत्तरं यच्छन् श्रीभागवतः अवदत् यत् ईदृशाः याचनाः कस्यापि वास्तविक-वैधानिक-चिन्तायाः अपेक्षया राजनीतिप्रेरिताः सन्ति। केरलस्य त्रिशूरनगरे आयोजिते ‘सङ्घयात्रायाः १०० वर्षाणि’ इति कार्यक्रमे सः अवदत् यत् हिन्दूधर्मः पञ्जीकृतः नास्ति। बहवः विषयाः पञ्जीकृताः न सन्ति; येभ्यः सर्वकारीयधनस्य आवश्यकता भवति, तैः पञ्जीकरणं करणीयं भवति, किन्तु सर्वकारः जानाति यत् सङ्घः अस्तित्वे अस्ति। श्रीभागवतः आर.एस.एस. सङ्घटनस्य रहस्यमयरूपेण कार्यकरणस्य आरोपान् प्रत्याख्याय अवदत् यत् सङ्घस्य गतिविधयः प्रकटद्रूपेण सञ्चाल्यन्ते, जनतायाः सम्मुखं च सन्ति। इयं टिप्पणी श्रीखडगे महोदयेन श्रीभागवतं प्रति लिखितात् एकात् पत्रात् परम् आगता। अस्मिन् पत्रे श्रीखडगे महोदयेन आर.एस.एस. सङ्घटनं प्रति तस्य वैधानिकस्थितिं, वित्तीयस्थितिं, सम्पत्तीः, कर-अनुपालनं च सार्वजनिकरूपेण प्रकटयितुं आव्हाहनं (चुनौती) कृतम् आसीत्।

# ब्रिटेनदेशे १६ वर्षात् न्यूनवयस्कानां बालकानां कृते सामाजिक-माध्यमानां (सोशल मीडिया) प्रतिबन्धः

ब्रिटेनदेशस्य प्रधानमन्त्रिणा कीर-स्टार्मर-महोदयेन १६ वर्षात् न्यूनवयस्कानां बालकानां कृते सामाजिक-माध्यम-मञ्चेषु (सोशल मीडिया प्लेटफॉर्म) प्रतिबन्धस्य घोषणा कृता अस्ति। सर्वकारस्य कथनम् अस्ति यत् इदं पदं बालकानाम् ऑनलाइन-सुरक्षां वर्धयितुं, मानसिकस्वास्थ्यस्य रक्षायै, सामाजिक-माध्यमानां व्यसनात् (लत) च रक्षितुम् उत्थापितं वर्तते। स्टार्मर महोदयेन सोमवासरे उक्तं यत् पूर्णप्रतिबन्धः एव उचितः विकल्पः अस्ति। तस्यानुसारम् अनेन बालकेभ्यः अधिकं सुरक्षितं वातावरणं प्राप्स्यते, ते च अध्ययनाय, क्रीडनाय, सामाजिक-गतिविधिभ्यः च अधिकं समयं लप्स्यन्ते।अयं प्रस्तावितः प्रतिबन्धः टिकटॉक, इंस्टाग्राम, फेसबुक, स्नैपचैट, यूट्यूब, 'एक्स' (X) च इत्यादिषु प्रमुखेषु सामाजिक-माध्यम-मञ्चेषु लागू भविष्यति। तथापि, व्हाट्सऐप-सिगनल-सदृशाः सन्देश-सेवाः (मैसेजिंग सेवाएं) अस्य परिधेः बहिः स्थास्यन्ति। सर्वकारः १६ वर्षात् न्यूनवयस्कानां बालकानां कृते लाइव-स्ट्रीमिंग-प्रक्रियायाः अपरिचितैः सह संवादस्य च सुविधां यच्छत्सु केषुचित् क्रीडन-विशेषणेषु (गेमिंग फीचर्स) अपि कठोरं नियन्त्रणं प्रयोक्ष्यति।

ब्रिटिश-सर्वकारेण विज्ञापितं यत् सः ऑस्ट्रेलियादेशस्य प्रतिरूपस्य (मॉडल) अनुकरणं करिष्यति। ऑस्ट्रेलियादेशेन गते वर्षे १६ वर्षात् न्यूनवयस्कानां बालकानां कृते सामाजिक-माध्यम-प्रतिबन्धः प्रयुक्तः आसीत्, तथा च ईदृशं करणहारः सः विश्वस्य प्रथमः देशः अभवत्। सर्वकारानुसारम् अस्य वर्षस्य अन्तपर्यन्तं आवश्यकाः नियमाः सज्जीकरिष्यन्ते, आगामिनः वर्षस्य वसन्तऋतुपर्यन्तं च प्रतिबन्धः प्रयोक्तुं शक्यते। अस्याः नूतननीतेः पूर्वं सर्वकारेण शिक्षकैः, अभिभावकैः, युवभिः च सह व्यापकः परामर्शः कृतः।



# ऋतुकाव्यम् (ग्रीष्मर्तुः)

**श्रीसूर्यः सकलेश्वरो दिनकरश्चन्द्रस्तदंशोज्ज्वलः**
**सर्वर्तुर्भुवि जायते तदयनात्तेषां परीवर्त्तनम्।**
**भूतेशो भुवनाधिपो ग्रहपतिर्लोकैकनाथो विभु**
**र्विश्वारोग्यकरो महाद्युतिधरः**
**पायादपायाज्जगत्॥१॥**

“अन्वयः”

श्रीसूर्यः महाद्युतिधरः, सकलेश्वरः, दिनकरः, भूतेशः, भुवनाधिपः, ग्रहपतिः, लोकैकनाथः, विभुः, विश्वारोग्यकरः। तदंशोज्ज्वलः चन्द्रः। तदयनात् भुवि सर्वर्तुः भवति, तेषां परीवर्त्तनं (च) जायते। (सः) अपायात् जगत् पायात्।

## “ऋतुकाव्यप्रदीपः”

सर्वत्र आरम्भसमये देवतः मङ्गलप्रार्थनां कुर्यात्। मङ्गलं विना न किमपि सिध्यति। अतः शिष्टाचारप्रसङ्गात् काव्यारम्भकाले आशीर्नमस्क्रियावस्तुभिः केनापि एकेन कोपि कविः मङ्गलमाचरति। तेन न्यायेन अयं कविरपि अत्रापि प्रथमतः मङ्गलं वक्ति। सूर्यस्य प्रभावादेव ऋतूनां सृष्टिः इति सर्वेषां मतम्। ततः ऋतुकाव्यारम्भे श्रीसूर्यमाश्रित्य आशीर्वादात्मकं मङ्गलपद्यम् उपस्थापयति।

श्रीसूर्यः सर्वेषां स्वामी भवति, अतः सः सकलेश्वरः कथ्यते। सः दिनं करोति, अतः दिनकरः इति नाम वहति। चन्द्रः अपि सूर्यस्य प्रकाशेन एव शोभते। पृथिव्याम् ऋतूनां परिवर्तनं सूर्यस्य अयनगत्या संभवति। सूर्यः पञ्चमहाभूतानां जीवजगतः स्वामी, अतः भूतेशः इति कथ्यते। सः समस्तभुवनानां अधिपः पालनकर्ता, ग्रहाणां पतिः, लोकस्य एकः एव नाथः च। सः सर्वत्र विद्यमानः, अतः विभुः भवति। सूर्यः सर्वेषाम् आरोग्यं करोति तथा महान् तेजः धारयति। एवं महान् सूर्यदेवः सम्पूर्णं जगत् संकटेभ्यः रक्षतु इति भावः। अत्र सकलेश्वरः, दिनकरः, भूतेशः, भुवनाधिपः, ग्रहपतिः, लोकैकनाथः, विभुः, विश्वारोग्यकरः, महाद्युतिधरः चेति पदानां साभिप्रायप्रयोगात् परिकरनामालङ्कारः शोभते। अत्र पद्ये शार्दूलविक्रीडितच्छन्दः। लक्षणं छन्दोमञ्जर्यां यथा - सूर्याश्वैर्यदि मः सजौ सततगाः शार्दूलविक्रीडितम् - SSS, IIS, ISI, IIS, SSI, SSI, S इति।



**©टीकाकारः - वत्सदेशराजशर्मा संस्थापकाध्यक्षो- वैदिकगणः भारतम्**